# .. shrIviShNukavachastotram ..

# ॥ श्रीविष्णुकवचस्तोत्रम् ॥

## Sanskrit Document Information

Text title : viShNukavachastotram

File name : viShNukavachastotram.itx

Category : kavacha

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : shrIlakShmIkaTAkSha S K Rajagopalan 2001 collection of Laxmistotras

Latest update : May 5, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 5, 2017

*sanskritdocuments.org*

# ॥ श्रीविष्णुकवचस्तोत्रम् ॥

हरिश्चन्द्रः -
ब्रह्मन् श्रीविष्णुकवचं कीदृशं किं प्रपालकम् ।
केनोक्तं क ऋषिश्छन्दः दैवतं कीदृशं मुने ॥

अगस्त्यः -
हरिश्चन्द्र प्रवक्ष्यामि शृणुष्वावहितोऽधुना ।
श्रीविष्णुकवचं दिव्यं रहस्यं सर्वगोपितम् ॥

सृष्ट्यादौ कमलस्थाय ब्रह्मणे हरिणोदितम् ।
कारुण्येन मम प्रोक्तं ब्रह्मणो क्षीरसागरे ॥

गोपनीयं प्रयत्नेन भवता च जयप्रदम् ॥

अस्य श्रीविष्णुकवचस्तोत्रमहामन्त्रस्य -
ब्रह्मा ऋषिः - अनुष्टुप् छन्दः, श्रीमन्नारायणो देवता,
श्रीमन्नारायणप्रसादसिद्ध्यर्थे जपे विनियोगः ।
ॐ केशवाय अङ्गुष्ठाभ्यां नमः ।
ॐ नारायणाय तर्जनीभ्यां नमः ।
ॐ माधवाय मध्यमाभ्यां नमः ।
ॐ गोविन्दाय अनामिकाभ्यां नमः ।
ॐ विष्णवे कनिष्ठिकाभ्यां नमः ।
ॐ मधुसूदनाय करतलकरपृष्ठाभ्यां नमः ॥

ॐ त्रिविक्रमाय हृदयाय नमः ।
ॐ वामनाय शिरसे स्वाहा ।
ॐ श्रीधराय शिखायै वषट् ।
ॐ हृषीकेशाय कवचाय हुं ।
ॐ पद्मनाभाय नेत्राभ्यां वौषट् ।
ॐ दामोदराय अस्त्राय फट् ।
भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम् ।
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं,

विश्वाकारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं,
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं, विष्णुं वन्दे सर्वलोकैकनाथम् ॥

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षस्थलशोभिकौस्तुभं, नमामिविष्णुं शिरसाचतुर्भुजम् ॥

ॐ पूर्वतो मां हरिः पातु पश्चात् श्रीः सदक्षिणे ।
श्रीकृष्ण उत्तरे पातु श्री गो विष्णुश्च सर्वशः ॥

ऊर्ध्वं मे नन्दनी पातु अधस्तात् शार्ङ्गभृत् सदा ।
पादौ पातु सरोजाङ्घ्री अङ्गे पातु जनार्दनः ॥

जानुनी मे जगन्नाथः ऊरू पातु त्रिविक्रमः ।
गुह्यं पातु हृषीकेशः पृष्ठं पातु ममाव्ययः ॥

पातु नाभिं ममानन्तः कुक्षिं राक्षसमर्दनः ।
दामोदरो मे हृदयं वक्षः पातु नृकेसरी ॥

करौ मे कालियारातिः भुजौ भक्तार्तिभञ्जनः ।
कण्ठं कालाम्बुदश्यामः स्कन्धौ मे कंसमर्दनः ॥

नारायणो मेऽव्यान्नासां कर्णौ मे च प्रभञ्जनः ।
कपालं पातु वैकुण्ठः जिह्वां पातु दयानिधिः ॥

आस्यं दशास्यहन्ताव्यात् नेत्रे मे पद्मलोचनः ।
भ्रुवौ मे पातु भूमा च ललाटं मे सदाच्युतः ॥

मुखं मे पातु गोविन्दः शिखां गरुडवाहनः ।
मां शेषशायी सर्वेभ्यो व्याधिभ्यो भक्तवत्सलः ॥

पिशाचाग्निज्वरेभ्यो मां आपद्भ्योऽवतु माधवः ।
सर्वेभ्यो दुरितेभ्यश्च पातु मां पुरुषोत्तमः ॥

इदं श्रीविष्णुकवचं सर्वमङ्गलदायकम् ।
सर्वरोगप्रशमनं, सर्वशत्रुविनाशनम् ॥

एवं जजाप तत्काले स्यात्परश्चाक्षरं परम् ।
त्रिस्सन्ध्यं यः पठेच्छुद्धः सर्वत्र विजयी भवेत् ॥

इति श्रीविष्णुकवचस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIviShNukavachastotram ..
was typeset using XeLaTeX 0.99996
on May 5, 2017

Please send corrections to *sanskrit@cheerful.com*